सारसंग्रहे शृंगारवर्णनम्

२१८

सार संग्रह
शृंगार दर्पण
ग्रन्थ सं:
कश्मीरी
F. 9
4-72 (5) मासांक:
8.12.92

काव्य ५

शृंगारवर्णन

३४५

सं. शृंगारवर्णनम्

श्री

॥ ॥श्रीगणेशाय नमः॥ ॥अथ मंगलाचरणम्॥ सानंदं नंदिहस्ताहतमुरजरवाहूतकौमारबर्हित्रासान्ना
साग्ररंध्रं विशति फणिपतौ भोगसंकोचभाजि॥ गंडोड्डीनालिमालामुखरितककुभस्ताण्डवे
शूलपाणेर्वैनायक्यश्चिरं वो वदनविधुतयः पान्तु चीत्कारवत्यः॥१॥ दृष्टितो हस्तावलग्नः प्रसभम
भिहतोप्याददानैः राशुकान्तं गृहीत्वा केशेषु पास्तश्चरणनिपतितो नेक्षितः संभ्रमेण॥ आलिंगन्यो
वधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधः स दहतु दुरितं शांभवो [redacted]
वः शराग्निः॥२॥ तपस्वी कां गतोऽवस्थामिति स्मेराननेनोत्सुकौ गि
रिजायाः कुचौ वंदे भवभूतिसिताननौ॥३॥ उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विलुलितकबरीभारमंसे वहन्त्याः। भूयस्तत्कालकान्तिद्विगुणितसु राम
रतप्रीतिनाशौरिणा वः शय्यामालिंग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु॥४॥ ॥इति मं

गलावर्णनम्॥ अथ नायिकावर्णनम्॥ अनुच्छिष्टो देवैरपरिदलितो राहुदशनैः कलंकेनास्पृष्टो न खलु
परिभूतो दिनकृता॥ कुहूभिर्नो लुप्तो न च युवतिवक्त्रेण विजितः कलानाथः कोयं कनकलतिका
यामुदयते॥ ५॥ किमिन्दुः किं पद्मं किमु मुकुरबिंबं किमु मुखं किमब्जं किं मीनौ किमु मदनबाणौ।
किमु दृशौ॥ खगौ वा गुच्छौ वा कनककलशौ वा किमु कुचौ वा तडिद्वा तारा वा कनकलतिका वा किमबला
वा॥ ६॥ ॥इति नायिकावर्णनं॥ ॥अथ हारवर्णनं॥ अन्येपि संति गुणिनश्छकति नो जगत्यां हारत्वमेव गु
णिनामुपरिस्थितोसि॥ एणीदृशामुरसि नित्यमवस्थितस्य सद्वृत्तता च शुचिता च न खंडिता ते॥ ७॥ स्त
नाहारमुग्धा भूयनोपसर्पिः स्तनद्वया॥ विभवे यस्य काठिन्यं व्यर्थं तदुपसर्पणम्॥ ८॥ रत्नाकरात्परिवृ
त्ता वसतिः किमन्यदङ्गीकृतः कठिनवेधनदुःखभारः॥ वक्षोजकुंभपरिरंभणलोलुपेन किं किं व्रतेन
विहितं बत मौक्तिकेन॥ ९॥ ॥इति हारः॥ ॥अथ रोमावलीवर्णनम्॥ दत्तं मया पदमिदं नवयौवनाय त्वंस
त्वरंकच नशेशव साधयेति॥ कामस्य हस्तलिखिताक्षरमालिकेव रोमालिका विजयते जलजेक्षणायाः॥

: ॰ इयंसृष्टाविधात्कनकलतिकापंकजभुवा निषिक्ता लावण्यामृतरसभरेणानुदिवसां अकस्माद्रोमाली मधुपपटलीह स्फुरति यन्नतः
शंके पुष्पोद्गमसमयमायातमधुना ११ रचयति युवनेत्रश्रेत्रपीयूषवृष्टिं नवजलधरगामाशात्वारोमराजिश्छलेन॥ यदुदयति कला
पिशाचियेयंतडुच्चे८ स्तनवनसमयोस्यामाविरस्तीति विद्म८ १२ इतिहारवर्णनम्॥ अथहाररोमावलीवर्णनम्॥ उत्तुंगस्तनपर्वताद्व
नरङ्गंगेव हारावली रोमाली नवनीलनीरदरुचि८ सेयं कलिंदात्मजा॥ जातं तीर्थमिदं सुपुण्यजनकं यन्नानयो८ संगमश्चंद्रोम
ज्जति लांछनापहृतं येनूनं नरवांकच्छलात्॥१३॥ इतिहाररोमावली॥ अथ [illegible]मावर्णनम्॥ आस्येंदो८ परिवेषवद्गतिपतेस्सां
येयकाडं ड्रवद्धास्मि हंतावुमुवरुणाघातिवदासज्योक्षिपंती मुडौ॥ विश्लिष्यद्दुलिलस्सनाभिविगलन्नीवीमुन्नमम्मध्यमं किंचि
त्किंचिदुदंचदंचलमहो कुंभस्तनीजृंभते॥१४ इतिजृंभा॥ अथवेणीवर्णनं॥ पाणौ दृशः पाणिपुटेनिरुद्धावेणी विरेजे
शायनोत्थितायाः॥ सरोजकोशाद्विवनिस्सरंती श्रेणीद्विनीभूयमधुव्रतानां॥१५॥ इतिवेणीवर्णनं
॥अथवयःसंधिवर्णनम्॥ संनद्धोयं नवतरुणिमा कामममास्कंदकामो नेनां मुंचत्यहहहसहसा कौतु राम
कीलालभावः॥ यद्देराज्यं वरनरतरतनुस्वर्णाभूमोघवृत्तं प्रायस्तत्समादनुदिनमयं द्धीयत्तेम २ राम

ध्वदेशः॥१६॥मंदंयंदभ्रवाणाघुटकोपांतगंता दृगंतः किंचित्किंचिद्विरमतिमनो धूलिके
लीरसेभ्यः॥आविर्भावस्तनमुकुलयोः कापि कांतिः समंतादघष्योत्का कुसुमधनुषो यौवराज्या
भिषेकः॥१७॥अचलं चलदिव चक्षुः प्रकृतमयीदं समुद्यादिव वक्षुः॥अतदिव तदपि शरीरं संप्र
ति वामभ्रुवो जनयति॥१८॥मुग्धायाः सध्रीचीनवयवनवीचा विजयते कुचश्रीः कर्कंधुफलमपि नवं धूर्त
तवती॥नशीलं दृग्भंगी कलयति कुरंगीनयनयोस्तथापि श्रीरस्याः मुखजननमस्याविलसति
॥१९॥नदंतुरमुरस्थलं ववसिना श्रिता चातुरी विकारि न विलोकितं भ्रूविनवक्रिमोपक्रमः॥त
थापि हरिणीदृशो वपुषि कापि तुष्टापरा हृतमहामणाघकृतिरिवात्र संलक्ष्यते॥२०॥अनाहूते रे
वप्रियसहचराणां शिशुतया वचोभिः पांचाली मिथुनमधुना संगमयितुं॥उपादत्ते नो वा विरम
ति न वा केवलमियं कपोलौ कल्पाणा पुलककुलैर्दंतुरयति॥२१॥ ॥इति वयःसंधिः॥ अथ काव
रुत्तिः॥अद्धं लोचनकोणापवक्रपयाड्यायते सर्वदा कंरु का कुवचः प्रभुसकमलक्रोडस्य

श्रीः
३

म्टंगायते॥हारावो हृदयेवियोगिकुलजा कामा।भिलाषायते वैदेही विरहज्वरो रघुपतेरापा कत्ता
पायते॥२२॥मदनदहनसुष्पत्क्षान्तकांताकुचांतर्घनमलयजपंके गाढवद्धाखिलांघ्रिः॥
उपरिविततपक्षोलक्ष्यतेलिर्निमग्नः।शरइवकुसुमेषोरेखपुंखावशेषः॥२३॥अयेकोजा
नीतेनिजपुरुषसंगोनहितथायथास्त्रीणांचेतःपरपुरुषसंगोरमयति।अपिस्वेरंभुक्त्वादि
वसमखिलंवासरकृताकरस्पर्शादिंदोर्मुकलयतिनेत्राणिनलिनी॥२४॥अस्तंग
तवतिसवितरिभर्त्तरिमधुपंनिवेशयकोशांते।कमलिन्योपिरमंतेकिमत्रचित्रंमृगा
क्षीणाम्॥२५॥इभकुंभतुल्यकुचकुंभसुगाया:परिरंभसंभ्रमसुखेनभवान्या:।गि
रिशोपिचापदलनंवहुमेनेनहिवस्तुहानिमनुशोचतिकामी॥२६॥इदंमरममुंदरंन
नुपुरंकुरंगीदृशोनिवार्यननुशेशवंस्वयमनेमनीतंचलात्॥तदागमनशंकयामक
रकेतुनाकिंकृतोपयोधरखराधरोतिवलितादितीडमरो॥२७॥एकत्रकोलजतभंगाश्रं

३ राम ३

सुनयनापाणयोरणात्कंकणोपस्खलंविनि केशपाशनि चये युक्तो हि बंधक्रमः॥८५॥ आश्लेषशोषारति
रंगनानामामोदशेषा कुचकुंकुमश्रीः॥ तूणीरशेषः कुसुमायुधोपि प्रभातशेषा रजनी बभूव॥ पयाम्र
त्रैभकुंभपरिणाहिनि कुंकुमार्द्रे कांतापयोधरयुगे रतिखेदखिन्नः॥ वक्षो निधाय भुजपंजरमध्यव
र्तीधन्यः क्षपां क्षपयति क्षणलब्धनिद्रः॥८६॥ अथ विपरीतसुरतांतवर्णनम्॥ उपरिनिपतितानां स्र
स्तधम्मिल्लकानां मुकुलितनयनानां किंचिदुन्मीलितानां॥ सुरतजनितखेदक्लिन्नगंडस्थलीना
मधरमधु वधूनां भाग्यवंतः पिबंति॥८७॥ स्विन्नं मंडलमैंदवं विगलितं स्रग्दाम वद्धं तमः प्रागेव प्रथ
मानकेतकशिखावलीरायितं विस्मृतं॥ शांतं कुंडलताडवं कुवलयद्वंद्वं तिरोमीलितं वीतं विद्रुमसा
त्कृतं नहि ततो जाने किमासीदिति॥८८॥ मुक्ताभूषणमिंदुबिंबमजनि व्याकीर्णतारं तमः॥ स्मारं चा
पमपेतचापलमभूदिंदीवरे मुद्रिते॥ विश्रांतं कलकंठिकंठरणितं मंदानिले मंदितं निष्कंपस्तवका
चचंपकलतासामभून्न जानेय किम्॥८९॥ ॥इति विपरीतसुरतांतवर्णनम्॥ अथाभिसारिकावर्णन

श्री० शाक्वप्रस्थितासि करभोरु घने निशीथे जीवाधिको वसति यत्र जनः प्रियो मे॥ एकाकिनी वद कथं न बिभेषि बा
८ ले नन्वस्ति पुंखितशरो मदनः सहायः॥९०॥ वित्रं न्यस्तादपि विषधराद्भीतिभाजो निशायां किंनु ब्रूमस्त्व
दभिसरणोत्साहसं नाथ तस्याः॥ ध्वाते गाढे निभृत निभृतं बालयात्मप्रकाशत्रासात्पाणिः पथिकाणि
६ फणारत्नरोधि व्यधायि॥९१॥ मार्गे पंकचिते घनांधतमसे निःशब्दसंचारया गंतव्याद्य मया प्रिय स्यव
सतिरित्युग्धेति कृत्वा मतिम्॥ व्याजानूहृतनूपुरा करतले नाच्छाघने त्रंभृशं कृछाल्लब्धपदस्थितिः स्व
भवने पंथानमभ्यस्यति॥९२॥ दूती विद्युदुपागता सहचरी रात्रिः सहस्याघिनी देवज्ञो दिशति
स्वनेन जलदः प्रस्थानवेलां शुभां॥ वाचं मांगलिकं उतनोति तिमिरस्तोमोपि झिल्लीरवैर्ज्ञातोर्थ
इयिताभिसारिसमयो मुग्धे विमुंच त्रपां॥९३॥ भीतासि नेव भुजगात्पथि मद्भुजस्य संगे पुनः कि
मपि कंपमुरो करोषि॥ अंभोधरध्वनिभिरद्भुभिवासितन्विमद्य चित्याचिवदनासि किमाचरामि राम
॥९४॥ स्फुरदुरसिजमार्थ्यं गुरांगा किशलयकोमलकांतिना परेन॥ अथ कथय कथं सहेत गं ८

तुंयदिननिशासुमनोरथःस्यात॥९५॥इत्यभिसारिका॥अथनायकचिंतनं॥आस्तांदूरेण।विश्लेषःप्रि
यामालिंगतोमम॥स्वेदःकिन्नुसरिन्नाथोरोमांचःकिंनुपर्वतः॥९६॥अद्यापितन्मनसिसंपरिवर्त्तते
मेरात्रौमयिक्षुतवतिक्षितिपालपुत्र्या॥जीवेतिमंगलवचःपरिहृत्यकोपात्कर्णेकृतंकनकपत्रम
नालपंत्या॥९७॥अनुदिनमभ्यासदृढैःसोढुंदीर्घोपिशक्यतेविरहः॥अत्यासन्नसमागममुहूर्त्ता
र्द्धंसुदुःसहोविरहः॥९८॥नयनेननिरीक्षितानतांगीहृदयेहंतपतत्रिणःपतंति॥विषमाविष
मायुधव्यवस्थापरिमूर्येतपरः।परापराधे॥९९॥अभिमुखेमयिसंहृतमीक्षितंहसितमन्यनि
मित्तकृतोदयम्॥विनयवारितवृत्तिरतस्तयानविवृतोमदनोनचसंवृतः॥१००॥धम्मिल्लंपरिव
ध्नतीनखमुखैःसीमन्तमातन्वतीपश्यन्तीनखरोऽर्पयंकुचयुगेसव्यापसव्यंमुहुः॥नाभीसी
मनिकुंचितांगुलिदलंनीवीभरंरुंधतीशय्यागारविनिर्गतापिहृदयान्माद्यापिनिष्क्रामति॥१
कुवलयनयनांकुचांतरेषुक्षणमपियेनशेरत्तेयुवानः॥हरिहरिकरुणापराङ्मुखोयंगणयति

श्री० ९

तान्यपिवासराणिवेधाः॥२॥प्राणानांचप्रियायायाअस्तुदशःसादृश्यप्रकाशिता॥प्रियाकंठगतारत्ने
ष्वाणामरणाहेतवः॥३॥यांत्वामुहुर्वलितकंधरमाननंतदाच्छन्नच्छन्नदृष्टशतपत्रनिभंवहंत्या॥
दिग्पोमृतेनचविषेणाचपक्ष्मलाक्ष्यागाढंनिखातइवमेहृदयेकटाक्षः॥४॥कान्तामुखंवपुखतके
लिविमर्द्दखेदसंजाततचर्मकणाविच्छुरितरंतान्न॥५॥यांडरंविलसदर्द्धनिमीलिताक्षंसंस्मृत्य
होहृदयकिंशतधानयासि॥५॥किंगतेनयदिसानजीवतिप्राणितिप्रियतमातथापिकिं
मूः॥इत्युदीक्ष्यनवमेघमालिकांनप्रयातिपथिकःस्वमंदिरं॥६॥यदिस्मरामितांतन्वींजीवित
आकुतोममा॥अथविस्मृत्यजीवामिजीवितव्यसनेनकिम्॥७॥यादिप्रियविप्रयोगेपिरिवघ्नतेदीनदीन
कम्॥तदिदंदग्धमरणामुपयोगज्ञायास्यति॥८॥देवात्पश्येयदिहविवरंनिच्छयामन्तप्रियांचेदाश्वास्यादे
तदनुकथयमार्घवीयामवस्थां॥आशातंतुर्नचकथयतात्यंतमुच्छेदनीयः प्राणात्राणांकथमपिकरोत्य म
यतास्याःसपत्क्वः॥९॥दह्यमानेऽपिहृदयेमृगाक्ष्यामन्मथाग्निना॥स्नेहस्तथैववयतस्योतदाश्चर्यमिवा

भवतः॥२०॥ दयिताबाहुपाशस्य कुतोयमपरो विधिः॥ जीवयत्यर्पितः कंठे मारयत्यपवर्जितः॥२१॥ वसंतप्रारंभो
रविरहखिन्ना सहचरी यदि द्याः॥ नूंवेत्त दिहवधभागी भवतिकः॥ वयोवा सेहो वा कुसुमविशिखो वेति
विमृशन्नुहातिस्तद्य त्तं पिकनिकरं भं कारमशृणोत्॥२२॥ ऊरूरंभा दृगपिकमलं शेवलं केशपाशो
वक्त्रं चंद्रो लपितममृतं मध्यदेशो मृणालं॥ नाभिः कूपो वलिरपि सरित्पल्लवः किं वपाणिर्धिस्याः सा
चेद्दूरसि न कथं हंत तापस्य शांतिः॥२३॥ पुनरपि मिलनं यदा कदाचित्प्रियतम या कृपया भवेद्धि
धातुः॥ हरिखिकरवेहृदि प्रतिष्ठां हरद्दवकितनवेतनोरभिन्नां॥२४॥ ॥इति॥ अथ नायकवाक्यं स
खायं प्रति॥ यामि प्रेयसि वारिदागमदिने ज्ञानाहि मामागतं चिंतां चेत्त सिमा विधेहि कथयत्येवं सवा
ष्पमयि॥ निश्वासैः पवनायितं वरतनोरंगैः कदंबायितं कांत्या केतकपत्रकायितमहो दृग्भ्यां पयो
दायितम्॥२५॥ ॥अथ नायकं प्रति मित्रवाक्यम्॥ वार्ता कापि न विश्रुता खलु मया भोः पांथ किं कथ्य
तामेतावन्न व वेश्म नः परिसरे णागच्छता वीक्षितम्॥ बाष्पव्याकुललोचनाः परिजनाः पौरा निरुद्धा

श्री॰ शय्ववाः निःशेषोद्धृतपल्लवाः द्विति रुहो निष्पञ्जिनी कंसरः॥१६॥ द्वारिस्तं भिनिषण्णया मलिन या [illegible]
१० वक्त्रा कान्तग्रीवया नासाग्रागत बाष्पविन्दु वमनैः संस्विद्यमाना स्वयं॥ मन्युस्तंभितकंठगद्गदगिरा
प्रोच्चारिताद्धो द्वारं संदिश्य तव कान्तया पथिकहे वक्तुं न तत्पार्यते॥१७॥ अथ नायिकावाक्यं नायकं प्रति
10 ॥उर्व्यां कोपि महाधरो लघुतरो दोर्भ्यां धृतो लीलया तेन त्वं दिवि भूतले च सततं गोवर्द्धनोद्धारकः॥ त्वां
त्रैलोक्यधरं वहामि कुचयोरग्रे न तद्गण्यते किंवा केशव भाषणेन बहुना पुण्यैर्यशो लभ्यते॥१८॥
कान्ते कनकजं वीरं करोकिमपि कुर्वन्ती॥ आगारनिखिते भानो विंदुमिंदुमुखी दधौ॥१९॥ कान्ते कथं
चिद्गदितप्रयाणे दीर्घां विनम्रा विरहार्द्दिताङ्गी॥ ततस्तमालोक्य कदागतोसीत्यालिंग्य कांता मुदमा
ससाद॥२०॥ गच्छगच्छसि चेत्कान्त पंथानः संतु ते शिवाः॥ ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्॥
२१॥ अथ नायिकावाक्यं सपत्नीं प्रति॥ मा गर्वमुद्वह कपोलतले चकास्ति कान्तस्वहस्तलिखिता ख
लुमञ्जरीति॥ अन्यापि किं न सखि भाजनमीदृशीनां वैरी न चेद्भवति वेपथुरंतरायः॥२२॥ मामि

न्योविदधृत्तमागधेयभाजः केयूरंखञ्जनमवतंसमवुजानैः॥ धिग्देवंममतनुविभूषणानि दूरेरोलंवाधरानि
वारतांगुमथीः॥२३॥ अथस्वयंदूती॥ भोपांथपुस्तकधरक्षणमत्रतिष्ठवैद्योसि किंगणकशास्त्रवि
शारदोसि॥ केनोषधेनममपश्यतिनक्रमंवाकिम्वागमिष्यतिपतिःसुचिरप्रवासी॥२४॥ अथनायिका
वाक्यंदूतींप्रति॥ दूतिश्वासविशेषएषकिमहोचंडित्वरा भवनादिप्रष्टालकवल्लरी कथमहोलज्ञा
घयादर्पणात्॥ विस्रष्टोधरराग वल्लवरुचिस्त्वत्कार्यसंजल्पनाद्वासस्तस्यकिमंगसंगसंगतम
हो विश्वासहेतोस्तव॥२५॥ अथनायकविदेशगमनसमयेनायिकाया॥ अवस्थावसीनमा॥या
मीत्युक्तेहृदयपतिनापचषाःशंखभूषाःस्वैरंस्वैरं॥ टितिगलितास्पाणिपंकेरुहाग्रात्॥ नो
यास्यामीत्यथपदमिमांवाचमाकर्णयंत्यास्तन्व्याःशेषाअपिचटचटेत्येवभंगंसमीयुः॥२६
॥ यामीतिप्रियपृष्टायाप्रियाया॥ कंठवातीनि॥ वचोजीविनगोरासीत्पुरोनिःसरणोरणः॥२७
॥ अभ्यर्थयेकिमपिजीवितजन्मबंधोमत्कंठतोद्घटितिनिःसरतावदेव॥ कान्तेदृगंतपथिलंघि

श्री०
११
॥

निर्जीवतीतियावंनकर्णापथमेतिजनापवादः॥२८॥सांत्वप्रायैःप्रणायवचनैर्गत्नमाष्टक्कमानेका
न्नैतिर्येड्ढ्रमितदनारुंधतीवाष्पपूरां॥दीर्घोछ्वासस्यगनविगलोत्कंपिनासापुटान्नासंख्याभूनं
गणयतिमृगीचलोचनाकंकणानि॥२९॥अथदंपत्योःपरस्परंपत्रलेखनं॥प्राणेशविज्ञप्तिरि
यंमदीयात्तत्रैवनेयादिवसाःकियन्तः॥संप्रत्ययोग्यस्थितिरेषदेशः कराहिमांशोरपितापयं
ति॥३०॥कराहिमांशोरपितापयंतिनेतत्रप्रियेचेत्तसिशंकनीयम्॥वियोगतसेहृदयेमदीयेत
त्रस्थितानात्वंसमुपैषितापम्॥३१॥अत्रजानिप्रतिदिनमेघाकर्द्दमशोषाकर्द्दमशोषामदंगसंगेन॥इ
तिदिनमपूरिपिपासमदक्षिसपान्निभिःसलिलैः॥३२॥त्वामालिख्यप्रणायकुपितांधातुरागैःशि
लायामात्मानंतेचरणापतितंयावदिच्छामिकर्तुम्॥अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यतेमे
क्रूरस्तस्मिन्नपिनसहतेसंगमंनौकृतांतः॥३३॥ ॥इतिप्रथमविरहिणी॥अथतस्याःसखीवाक्यंनाय
कंप्रति॥सुहृद्व्यजनवीजनैर्वहलचंदनासेचनेसरोजदलसंगमैरपिनचेष्टतेसुंदरी॥परंत

तवनामनि प्रियसखीभिरावेदिते निवेदयत्ति जीवितंश्रवाऽऽसीन्निरामोऽङ्गमः॥ ३४॥ अच्छिन्न
नयनाम्बुधंबुधुक्रतं तापः सखीष्वाहितोन्यस्तं दैन्यमशेषतः यदि जनेचिंता गुरुभ्योर्पिता॥ अघश्वाः ख
लु निर्वृतिं व्रजति साश्वासैः परं खिद्यते विश्रब्धो भवति प्रयोगजनितं दुःखं विभक्तं तया॥ ३५॥ तवविरहम
सहमाना प्राणान बलास्वयं विमुक्तवती॥ किंतु तथाविधमंगं न सुलभमिति तेन मुञ्चति॥ ३६॥ तथ्यामहा
विरहवह्निशिखाकलापतप्ते स्थितासि सततं हृदये प्रियायाः॥ प्रायेण सीकसमेहृदि सा कृपालो
वालाबलां वसति नैव खलु त्वदीये॥ ३७॥ अथनामापिकान्त्राकंथसखीःप्रति॥ अपिवारयमलयानिल
मपसारयवेदनं त्वरिता॥ योगेपवनेंधनयोः प्रबलो विरहानलो भविता॥ ३८॥ विभेमि सखि संवी
क्ष्य भ्रमराम्भूतकीटकं॥ तद्धानागतेपुंस्वेतेन सार्द्धं कुतो रतिः॥ ३९॥ वपुषि तव न मोति रत्नभूषा प्र
सुरिति धन्यतमासि किं ब्रवीमि॥ सखि मत्तु नयनांतरालभीरुः कलयति मेन विभूषणानि कान्तः
॥ ४०॥ कलयति कमलोपमानमक्ष्णोः पृच्छयति वा चिबुधारसस्य मम॥ सखि कथय किमाचरामि कान्ते

12

समजनितत्रसहिष्णुत्वैवदोषः ॥ ४१ ॥ याः पश्यसि प्रियं स्वप्नेष्वन्यास्ताः सखियो पितः ॥ अस्माकंतु
१२ गतेकान्तेगतानिद्रापि वैरिणी ॥ ४२ ॥ यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलि
तमालतीसुरभयः प्रौढाः कदंबानिलाः ॥ सा चैवास्मि तथापि हंत सुरतव्यापारलीलाविधौ रेवा
रोधसि वेतसीतरुतले चेतः समुत्कंठते ॥ ४३ ॥ अथ विरहिणीप्रलापः ॥ पंचत्वं तनुरेतु भू
तनिवहाः स्वस्वं विशंत्वालयं याचे त्वां द्रुहिण प्रणम्य शिरसा भूयोपि कृत्वांजलिम् ॥ तद्वापी
षु पयस्तदीयमुकुरे ज्योतिस्तदीयालये व्योम्नि व्योम तदीयवर्त्मनि धरा तत्तालवृंते निलः ॥ ४४
रुष्टे का परपुष्टमंदिकाहंत मारुते चक्री ॥ त्वयि गतवति हृदयेशे जीवनदातापि जीवनं हरति ॥
४५ ॥ रोलंबा मधुपः पिकः परभृतो रे भ्रान्तुसारी मरुत्कीरो भाषितवाक्यमात्रपठनप्रौढः पयोदो
उडुः ॥ हंसः संततपक्षपातनिरतस्तस्मादवस्थामिमामुत्थाहं प्रहिणोमि केन करिष्यंतायवः राम
नायमे ॥ ४६ ॥ संतापपचिरं चन्द्रतत्र न प्रतिबिंब्यसो ॥ निवार्यकरस्पर्शीरामस्याहं परिग्रहः ॥ ४७ ॥ १२

12

तुलकयसि चंद्रदीधितिमविरलमश्नासि नूनमङ्गाराञ्॥ अथि कस्तव खलु मन्येऽक्षि मिह चकोरावधा
रयसि॥४८॥ हरनयनहुताशज्वालया यो जलायारति नयनजलोद्वैः खाकृपाकीवहाया॥ तद
पिदहति चित्तं मामकं कथा करोऽंगा मदनशिरसि भूमिस्तूयावधावलाघा रतिनयनजलोद्वैः
खाकृपाकीवहाया॥ तदपि दहति चित्तं मामकं कथा करोऽंगा मदनशिरसि भूयः क्यावला
आगिलामी॥४९॥ अथ नायिकां प्रति सखीवाक्यं॥ गतिहरसि कुंभिनामपि च कुंभशोभामि
मामये हरिणलोचने न खलु भातिमालं वसो॥ इयं खलु विभाषिकान खलु वालिशे माहशां
हरेरपि हरामहे तदिहमध्यतः क्ष्मा वयं॥५०॥ अथ सप्रवसतीति प्रवः श्रोत्रसीमनि समागते स
ति॥ अथ एव निजपाणिगुंफिते पुष्पदाम निमहोरगभ्रमः॥५१॥ ती॥ ज्ञात्वाग्रे कठिनं कुचद्वयमिदं
तन्वंगि यत्नून तं तद्वक्षः परिहाय किं प्रियतमः शेषे समालिंगते॥ किं कुर्मः सखि नर्मकेलिषु मया
दष्टे रसेनाधरे रुष्टोयं गमनोद्यतस्तदधुना पंचाननमानीयते॥५२॥ अथ एव तु सखी नमस्कुरुयुर

१० न्वंदस्व वां शुभ्रियः कावेरीतटसंनिविष्टनयने सुभगे किमुन्नाम्यसि॥ आस्ते पुत्रि समीप एव सदनादंला
३ लाता लिंगितंन्यं च न्नीरतमालदंतुरदरी तत्रापि गोदावरी॥ ५३॥ उद्यानवापीषु कलापिबालेमागा
स्व मे केवयथागते हि॥ क्वचित्क्वचित्कंटकिनां तरूणां संगेन दुःखी स्तनभार एषः॥ ५४॥ पद्मां
मुक्तास्तरलगतयः संश्रिता लोचनाभ्यां श्रोणीवंधस्त्यजति तनुतां सेवते मध्यदेशः॥ धन्नैव दृशः कु
चसविवतामद्वितीय त्वमास्यं त्वजाग्राणां स खिविनियमः कल्पितो यौवनेन॥ ५५॥ मन्नेभकुं
भकुंभयुगलं वहु धाविकार्यं मुक्तालिरालि परितापतितावि भाति॥ लीनाहरिणय इव तन्वि
तवांगवेष्टाः शंके सुधांशुवदने [illegible] सदने हरिस्ते॥ ५६॥ किं नायाति भुजंगसंगममियात्
किं वा स्फुरत्स्वर्धुनीस्यन्दूर्तः किमु नेत्रवह्निगरलज्वालाकलापादिह॥ इत्थं हंत हरस्य देववव
शतस्त्रिंतांबुधौ मज्जतो नो केव प्रथमागता भगवती निर्मातु शर्वाणि वः॥ २५७॥ ॥
॥ ॥ इति श्रीशंभुदासपंडितविरचिते सारसंग्रहे शृंगारवर्णनं समाप्तम्॥ ॥ ॥ राम